# Shri Lakshminrisimha Ashtottarashatanama Stotram

# श्रीलक्ष्मीनृसिंहाष्टोत्तरशतनामस्तोत्रम्

## Document Information

Text title : Lakshminrisimha Ashtottarashatanama Stotram

File name : lakShmInRRisiMhAShTottarashatanAmastotram.itx

Category : vishhnu, aShTottarashatanAma, dashAvatAra, vishnu

Location : doc_vishhnu

Transliterated by : Yash Khasbage

Proofread by : Yash Khasbage, NA, PSA Easwaran

Description/comments : Brahmandapurana. See corresponding nAmAvalI

Latest update : February 2, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# श्रीलक्ष्मीनृसिंहाष्टोत्तरशतनामस्तोत्रम्

अस्य श्रीलक्ष्मीनृसिंहाष्टोत्तरशतदिव्यनामस्तोत्रमन्त्रस्य
श्रीनारायण ऋषिः । श्रीनृसिंहो देवता । अनुष्टुप् छन्दः ।
श्रीनृसिंहप्रसादसिद्ध्यर्थे जपे विनियोगः ।

ॐ श्रीनृसिंहः पुष्कराक्षः करालविकृताननः ।
हिरण्यकशिपोर्वक्षोविदारणनखाङ्कुशः ॥ १॥

प्रह्लादवरदः श्रीमानप्रमेयपराक्रमः ।
अभक्तजनसंहारी भक्तानामभयप्रदः ॥ २॥

ज्वालामुखस्तीक्ष्णकेशस्तीक्ष्णदंष्ट्रो भयङ्करः ॥

उत्तप्तहेमसङ्काशसटाधूतबलाहकः ॥ ३॥

त्रिनेत्रकपिलः प्रांशु सोमसूर्याग्निलोचनः ।
स्थूलग्रीवः प्रसन्नात्मा जाम्बूनदपरिधृतः ॥ ४॥

व्योमकेशः प्रभृतिभिस्त्रिदिवेशैरभिष्टुतः ।
उपसंहृतसप्तार्चिः कवलीकृतमारुतः ॥ ५॥

दिग्गजावलिदर्पघ्नः कद्रूजविषनाशनः ।
अभिचारक्रियाहन्ता ब्रह्मण्यो भक्तवत्सलः ॥ ६॥

समुद्रसलिलत्राता हलाहलविशीर्णकृत् ।
ओजः प्रपूरिताशेषचलाचलजगत्त्रयः ॥ ७॥

हृषीकेशो जगत्त्राणः सर्वगः सर्वकामदः ।
नास्तिकप्रत्ययार्थाय दर्शितात्मा प्रभाववान् ॥ ८॥

हिरण्यकशिपोरग्रे सभास्तम्भसमुद्भवः ।
उग्राग्निज्वालमाली च सुतीक्ष्णो भीमदर्शनः ॥ ९॥

दग्धाखिलजगज्जंन्तुकारणं जगतामपि ।

आधारः सर्वभूतानां ईश्वरः सर्वहाटकः ॥ १०॥

विष्णुर्जिष्णुर्जगत्धामबहिरन्तः प्रकाशकः ।
योगिहृत्पद्ममध्यस्थो योगो योगविदुत्तमः ॥ ११॥

स्रष्टा हर्ता जगत्त्राता व्योमरूपी जनार्दनः ।
चिन्मयः प्रकृतिः साक्षी गुणातीतो गुणाश्रयः ॥ १२॥

मखविच्छेदकृत्कर्ता सर्वपाशविदारकः ।
व्यक्ताव्यक्तःस्वरूपो यः सूक्ष्मसदसदात्मकः ॥ १३॥

अव्ययः शाश्वतोऽनन्तो वीरजित्परमेश्वरः ।
मायावी मरुदाधारो निमिषोऽक्षर एव च ॥ १४॥

अनादिनिधनो नित्यःपरब्रह्माभिधायकः ।
शङ्खचक्रगदाशार्ङ्ग प्रकाशितचतुर्भुजः ॥ १५॥

पीताम्बरधरः स्रग्वी कौस्तुभाभरणोज्वलः ।
श्रियाध्यासितवामाङ्गश्रीवत्सेन विराजितः ॥ १६॥

प्रसन्नवदनः शान्तो लक्ष्मीप्रियपरिग्रहः ।
वासुदेवो महादेवो वाक्यपुष्पप्रपूजितः ॥ १७॥

उद्युक्ताहवहुङ्कारभीषिताखिलदिङ्मुखः ।
गर्जन्वीरासनासीनः कठोरकुटिलेक्षणः ॥ १८॥

दैतेयक्षतवक्षोऽसृगार्द्रीकृतनखायुधः ।
अशेषप्राणिभयदः प्रचण्डो दण्डताण्डवः ॥ १९॥

निटिलसृतघर्माम्बुसम्भूतज्वलिताननः ।
वज्रसिंहो महमूर्तिर्भीमो भीमपराक्रमः ॥ २०॥

स्वभक्तार्पितकारुण्यो बहूक्तो बहुरूपधृक् ।

एवं अष्टोत्तरशतं नाम्ना नरसिंहरूपिणः ॥ २१॥

नरकेसरिणा दत्तं स्वप्ने शेषाय धीमते ।
आयुरारोग्यसम्पत्तिः पुत्रपौत्रप्रवर्धन ॥ २२॥

इति श्रीब्रह्माण्डपुराणे श्रीनृसिंहाष्टोत्तरशतनामस्तोत्रं सम्पूर्णम् ।

Encoded by Yash Khasbage

Proofread by Yash Khasbage, PSA Easwaran

*Shri Lakshminrisimha Ashtottarashatanama Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*